वत्याः प्रकृतेरेव जगत्कर्त्तृतोचिता न पुनर्निर्गुणस्य ब्रह्मणः। मैवं मंस्थाः। आत्मैव कर्त्ता। यस्मादसौ जीवोपभोग्यसुखदुःखहेतुपुण्यापुण्यादेर्बोद्धा नह्यचेतनायाः प्रकृतेर्नामरूपव्याकृतविचित्रभोक्तृवर्गभोगानुकूलभोग्यभोगायतनादियोगिजगत्प्रपञ्चना घटते। तस्मादात्मैव कर्त्ता। तथा स एव ब्रह्म बृंहकोविस्तारकः। नचासौ निर्गुणः, यतः तस्य त्रिगुणा शक्तिरविद्या प्रकृतिप्रधानाद्यपरपर्य्याया विद्यते। अतः स्वतोनिर्गुणत्वेऽपि शक्तिमुखेन सत्त्वादिगुणयोगी कथ्यते। नचैतावता प्रकृतेः कारणता यस्मादात्मैव वशी स्वतन्त्रो न प्रकृतिर्नाम स्वतन्त्रन्तत्त्वान्तरन्तादृग्विधत्ते प्रमाणाभावात्। न च वचनीयं शक्तिरूपापि सैव कर्तृभूतेति। यतः शक्तिमत्कारकं न शक्तिस्तस्मादात्मैव जगतस्त्रिविधमपि कारणम्। तथा अजउत्पत्तिरहितः। अतस्तस्य यद्यपि साक्षाज्जननं नोपपद्यते। तथापि शरीरग्रहणमात्रेण जात इत्युच्यते। अवस्थान्तरयोगितयोत्पत्तिर्गृहस्थोजात इतिवत्" मिता० देहोत्पत्तिप्रकारःकायशब्दे वक्ष्यते।

**आत्मोद्भवा** स्त्री आत्मनैवोद्भवति भू—अच्। माषपर्ण्यां आत्मा उद्भवो यस्याः। २कन्यायां ३बुद्धौ च ४पुत्रे पु०। "आत्मोद्भवे वर्णचतुष्टयस्य" रघुः। ६मनोभवे कामे ७चित्तभवे शोकादौ च ८आत्मभवार्थमात्रे च त्रि०।

**आत्मोपजीविन्** त्रि० आत्मना देहव्यापारेण उपजीव्यति उप+जीव—णिनि २त०। स्वदेव्यापारोपजीवके भारिकदासादौ "शूद्रांस्त्वात्मोपजीविनः" "नैष चारणदारेषु विधिर्नात्मोपजीविषु" इति च मनुः। [ च त्रि०।

**आत्मोपम** त्रि० आत्मा देहउपमा यस्य १पुत्रे २निजसदृशे

**आत्मौपम्य** न०उपमायाभावः ष्यञ् औपम्यम् आत्मन औपम्यम्। आत्मसादृश्ये "आत्मौपम्येन सर्व्वत्र" गीता।

**आत्यन्तिक** त्रि० अत्यन्त+भवार्थे ठञ्। अतिशयेन जाते। "आत्यन्तिकासिद्धिविलम्बसिद्ध्योः" नै० "नाब्राह्मणे गुरौ शिष्योवासमात्यन्तिकं वसेत्" मनुः। "विभेदजनकाज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणा भेदमसन्तं कः करिष्यति" वे०प० स्त्रियां ङीप्। "आत्यन्तिकी स्वत्वनिवृत्तिः" मिता०

**आत्यन्तिकदुःखनिवृत्ति** स्त्री आत्यन्तिकीदुःखनिवृत्तिः। अपवर्गे मुक्तौ। सा च स्वाधिकरणदुःखप्रागभावासमानाधिकरणा दुःखनिवृत्तिः यादृश्या दुःखनिवृत्तेरुत्तरं पुनर्दुःखान्तरं नोत्पद्यते तादृशी दुःखनिवृत्तिः। दुःखञ्च अनागतस्वच्छावस्थं "हेयं दुःखमनागतमिति" पात० सूत्रात् अतीतदुःखस्य नष्टत्वात् वर्त्तमानदुःखस्य च तृतीयक्षण एव स्वयं नाशात् न तन्निवृत्तेः पुरुषार्थत्वमिति बोध्यम्।

**आत्यन्तिकप्रलय** पु० कर्म्म०। प्रलयभेदे। प्रलयस्तावत् चतुर्विधः" यथाह वेद०प० "स च चतुर्विधः नित्यः प्राकृतो नैमित्तिक आत्यन्तिकश्चेति। तत्र नित्यप्रलयः सुषुप्तिः तस्याः सकलकार्य्यप्रलयरूपत्वात् धर्म्माधर्म्मपूर्व्वसंस्काराणाञ्च तदा कारणात्मनावस्थानं तेन सुप्तोत्थितस्य न सुखदुःखाद्यनुपपत्तिः न वा स्मरणानुपपत्तिः। न च सुषुप्तावन्तःकरणस्यापि विनाशे तदधीनप्राणनादिक्रियानुपपत्तिः वस्तुतः श्वासाद्यभावेऽपि तदुपलब्धेः पुरुषान्तरविभ्रममात्रत्वात् सुषुप्तशरीरोपलम्भवत्। नचैवं सुषुप्तस्य परेतादविशेषः, सुषुप्तस्य हि लिङ्गशरीरं संस्कारात्मना तत्रैव वर्त्तते परेतस्य तु लोकान्तरे इति वैलक्षण्यात्। यद्वा अन्तःकरणस्य द्वे शक्ती ज्ञानशक्तिः क्रियाशक्तिश्चेति तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः न तु क्रियाशक्तिविशिष्टस्येति प्राणनाद्यवस्थानमविरुद्धम्। "यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति अथैनं वाक् सर्व्वैर्नामभिः सहाप्येति सता सौम्य! तदा सम्पन्नो भवति स्वमपीतोभवतीत्यादि" श्रुतिरुक्त सुप्तौ मानम्। प्राकृतप्रलयस्तु कार्य्यब्रह्मविनाशनिमित्तकः सकलकार्य्यविनाशः। यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्य्यब्रह्मणो ब्रह्माण्डाधिकारलक्षणप्रारब्धकर्म्मसमाप्तौ विदेहकैवल्यात्मिका परा मुक्तिः तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह विदेहकैवल्यम् "ब्रह्मणा सह ते सर्व्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति" श्रुतेः। एवं स्वलोकवासिभिः सह कार्य्यब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्माण्डतदन्तर्व्वर्त्तिनिखिललोकतदन्तर्व्वर्त्तिस्थावरादीनां भूतानाञ्च प्रकृतौ मायायां लयः न तु ब्रह्मणि, बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वादतः प्राकृत इत्युच्यते। नैमित्तिकप्रलयस्तु कार्य्यब्रह्मणोदिवसावसाननिमित्तकः त्रैलोक्यमात्रप्रलयो नैमित्तिकप्रलयः। ब्रह्मदिवसश्चतुर्युगसहस्रपरिमितः "चतुर्युगसहस्राणि ब्रह्मणोदिनमुच्यते" इत्यादिवचनात्। प्रलयकालोऽपि दिवसकालपरिमितः रात्रिकालस्य दिवसकालतुल्यत्वात्। प्राकृतप्रलये नैमित्तिकप्रलये च पुराणवचनानि प्रमाणानि "द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः। तदा प्रकृतयः सप्त कल्पन्ते प्रलयाय हि। एष प्राकृतिकोराजन्! प्रकृतौ यत्र लीयते" इति वचनं प्राकृतप्रलये मानम्।